संस्कृतवार्ताः

दिनांक २३-१०-२०२०

प्रातः ०६:५५

प्रातस्तन्यो वार्ता

प्रवाचकोऽनुवादकश्च पुरुषोत्तमः शर्मा

मुख्यवार्ताः

- प्रधानमन्त्री नरेन्द्रमोदी अद्य बिहार नैर्वाचनिकजनसभात्रयीं सम्बोधयिष्यति।
- आत्मनिर्भरभारताभियानस्य परिकल्पना बङ्गालात् दृढतां यास्यतीति प्रधानमन्त्रिणा प्रोदीरितम्।
- कोविड-संक्रमणात् स्वास्थ्यलाभमितिः समेध्य प्रतिशतं नवाशीत्यधिका संवृत्ता।
- भारतामेरिकयोः मध्ये मन्त्रिस्तरीय-सम्भाषणम् आगामि सप्ताहे नवदिल्ल्यां भविष्यति।
- अपि च
- आई.पी.एल क्रिकेटस्पर्धामालिकायां गतरात्रौ क्रीडिता स्पर्धा सनराइजर्य-हैदराबाद-दलेन विजिता।

- बिहारे विधानसभानिर्वाचनेभ्यः प्रचाराभियानं सततं प्रवर्धते। प्रथमचरणाय सर्वैरपि राजनीतिकदलैः यथाशक्यं प्रचारं विधीयते। प्रधानमन्त्री नरेन्द्र मोदी अद्य जमसभात्रयीं सम्बोधयिष्यते। गयायां सासारामे भागलपुरे च प्रधानमन्त्री अन्तर्जालमाध्यमेन जनसभाः सम्बोधयति । तृतीयचरणात्मकमतदानस्य नामांकनप्रत्यावर्तनस्य अद्य अन्तिमो दिवसो विद्यते। निर्वाचनप्रचारे अनियमितताकारणेन बिहारे कोविडसंक्रमणं संवर्धते।

- गतदिने कोलकातायां दुर्गा-पूजा-मण्डपस्य अन्तर्जालेनोद्घाटनावसरे प्रधानमंत्री प्रावोचत् यत् मुखाच्छादन-सामाजिकदूरता-परिपालनपुरस्सम् उत्सवायोजनं विधातव्यम्। आत्मनिर्भरभारताभियानस्य परिकल्पना बङ्गालात् दृढतां यास्यतीति प्रधानमन्त्रिणा प्रोदीरितम्। अस्माभिः बंगालस्य प्रगतिः गौरवपूर्णा संस्कृतिश्च समुन्नयनीये। केन्द्रप्रशासनमपि विविधयोजनाभिः बंगालवास्तव्यानां समस्यापाकर्तुं जीवनस्तरं च समुन्नेतुं प्रयतते।

- भारते कोविड-नवदश सङ्क्रमणात् स्वस्थ्यलाभ-प्रतिशतता भूयोपि नवाशीति-मिताधिका संवृत्ता । विगते अहोरात्रे नवसप्ततिः सहस्राधिकाः संक्रमणग्रस्ताः चिकित्सालयेभ्यः अवकाशं प्राप्तवन्तः । स्वास्थ्यमंत्रालयेन विज्ञापितं यत् साम्प्रतं यावत् चतु:सप्तति-सहस्रोत्तर-अष्ट-षष्टि-लक्षाधिकाः संक्रमण -पीडिताः स्वस्थाः अभूवन्। स्वस्थ्य-मितौ अनवरत-परिष्कारेण संक्रमितानां संख्या अपचीय नव-दशमलव-द्वि-नव-प्रतिशतमिता सञ्जाता।

- भारतामेरिकायोर्मध्ये मन्त्रिस्तरीय-सम्भाषणम् अग्रिमे सप्ताहे सम्भविष्यति । राजधान्यां नवदिल्ल्यां मंगलवासरे सम्भाषणमिदम् आयोजयिष्यते। रक्षामंत्री राजनाथसिंहः विदेशमंत्री सुब्रह्मण्यं जयशंकरश्च भागं ग्रहीष्यतः। एतदर्थम् अमेरिकायाः विदेशमंत्री माइक पोपियो अथ च रक्षामंत्री मार्क इस्परः रविवासरे सोमवासरे च भारतम् आगमिष्यतः ।

- भारतेनोक्तं यत् पाकिस्तानस्य सैन्यबलम् अकारणमेव अनारतं सङ्घर्षविरामोल्लङ्घनं करोति। सङ्घरिषविरामोल्लङ्घनम् आवासीयक्षेत्रेषु विधीयते। येन नियन्त्रणरेखायाः अवैधप्रवेशो भवेत्।

विदेशमंटन्त्रालयस्य प्रवक्ता अनुरागश्रीवास्तवः दृश्याङ्कनमाध्यमेन वार्ताहरसम्मेलने प्रत्यपादयत् यत् पाकिस्तानस्य अयं पदक्षेपो देशद्वयस्य संघर्षविरामसहमतेरूल्लङ्घनं विद्यते।

- आई.पी.एल क्रिकेटस्पर्धामालिकायां गतरात्रौ क्रीडिता स्पर्धा सनराइजर्य-हैदराबाद-दलेन विजिता। प्रथमं राजस्थानदलेन विंशतिः क्षेपचक्रेषु षड्क्रीडकाणां हानौ चतुर्पञ्चाशदुरैकशतं धावनांकलक्ष्यं स्थापितम्। लक्ष्यमनुसरता सनराइजर्स-हैदराबाद-दलेन क्रीडकद्वयस्य हानौ नवदशे क्षेपचक्रे सारल्येन विजयोधिगतः। शृंखलायाम् अद्य चैन्नई सुपर -किंग्स-दलं मुम्बई इण्डियन्स-दलं सम्मुखीकरिष्यति।

इति वार्ताः